

## एकादशः पाठः

# सावित्री बाई फुले

[शिक्षा हमारा अधिकार है। हमारे समाज में कई समुदाय इससे लम्बे समय तक वञ्चित रहे हैं। उन्हें इस अधिकार को पाने के लिए लम्बा संघर्ष करना पड़ा है। लड़कियों को तो और ज्यादा अवरोध झेलना पड़ता रहा है। प्रस्तुत पाठ इस संघर्ष का नेतृत्व करने वाली सावित्री बाई फुले के योगदान पर केन्द्रित है।]




उपरि निर्मितं चित्रं पश्यत। इदं चित्रं कस्याश्चित् पाठशालायाः वर्तते। इयं सामान्या पाठशाला नास्ति। इयमस्ति महाराष्ट्रस्य प्रथमा कन्यापाठशाला। एका शिक्षिका गृहात् पुस्तकानि आदाय चलति। मार्गे कश्चित् तस्याः उपरि धूलिं कश्चित् च प्रस्तरखण्डान् क्षिपति। परं सा स्वदृढनिश्चयात् न विचलति। स्वविद्यालये कन्याभिः सविनोदम् आलपन्ती सा अध्यापने संलग्ना भवति। तस्याः स्वकीयम् अध्ययनमपि सहैव प्रचलति। केयं

not to be republished

महिला? अपि यूयमिमां महिलां जानीथ? इयमेव महाराष्ट्रस्य प्रथमा महिला शिक्षिका सावित्री बाई फुले नामधेया।



जनवरी मासस्य तृतीये दिवसे 1831 तमे ख्रिस्ताब्दे महाराष्ट्रस्य नायगांव-नाम्नि स्थाने सावित्री अजायत। तस्याः माता लक्ष्मीबाई पिता च खंडोजी इति अभिहितौ। नववर्षदेशीया सा ज्योतिबा फुले महोदयेन परिणीता। सोऽपि तदानीं त्रयोदशवर्षकल्पः एव आसीत्। यतोहि सः स्त्रीशिक्षायाः प्रबलः समर्थकः आसीत् अतः सावित्र्याः मनसि स्थिता अध्ययनाभिलाषा उत्सं प्राप्तवती। इतः परं सा साग्रहम् आङ्ग्लभाषाया अपि अध्ययनं कृतवती।

1848 तमे ख्रिस्ताब्दे पुणे नगरे सावित्री ज्योतिबामहोदयेन सह कन्यानां कृते प्रदेशस्य प्रथमं विद्यालयम् आरभत। तदानीं सा केवलं सप्तदशवर्षीया आसीत्। 1851 तमे ख्रिस्ताब्दे अस्पृश्यत्वात् तिरस्कृतस्य समुदायस्य बालिकानां कृते पृथक्तया तया अपरः विद्यालयः प्रारब्धः।

सामाजिककुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन्। एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमानं सोढुं नाशक्नोत्। सा ताः स्त्रियः निजगृहं नीतवती। तडागं दर्शयित्वा अकथयत् च यत् यथेष्टं जलं नयत। सार्वजनिकोऽयं तडागः। अस्मात् जलग्रहणे नास्ति जातिबन्धनम्। तया मनुष्याणां समानतायाः स्वतन्त्रतायाश्च पक्षः सर्वदा सर्वथा समर्थितः।

'महिला सेवामण्डल' 'शिशुहत्या प्रतिबन्धक गृह' इत्यादीनां संस्थानां स्थापनायां फुलेदम्पत्योः अवदानम् महत्वपूर्णम्। सत्यशोधकमण्डलस्य गतिविधिषु अपि सावित्री

अतीव सक्रिया आसीत्। अस्य मण्डलस्य उद्देश्यम् आसीत् उत्पीडितानां समुदायानां स्वाधिकारान् प्रति जागरणम् इति।

सावित्री अनेकाः संस्थाः प्रशासनकौशलेन सञ्चालितवती। दुर्भिक्षकाले प्लेग-काले च सा पीडितजनानाम् अश्रान्तम् अविरतं च सेवाम् अकरोत्। सहायता- सामग्री-व्यवस्थायै सर्वथा प्रयासम् अकरोत्। महारोगप्रसारकाले सेवारता सा स्वयम् असाध्यरोगेण ग्रस्ता 1897 तमे ख्रिस्ताब्दे निधनं गता।

साहित्यरचनया अपि सावित्री महीयते। तस्याः काव्यसङ्कलनद्वयं वर्तते 'काव्यफुले' 'सुबोधरत्नाकर' चेति। भारतदेशे महिलोत्थानस्य गहनावबोधाय सावित्रीमहोदयायाः जीवनचरितम् अवश्यम् अध्येतव्यम्।



## शब्दार्थाः

| | | |
|---|---|---|
| **आदाय** | – | लेकर |
| **प्रस्तरखण्डान्** | – | पत्थर के टुकड़ों को |
| **सविनोदम्** | – | हँसी मजाक के साथ |
| **आलपन्ती** | – | बात करती हुई |
| **अजायत** | – | पैदा हुई |
| **अभिहितौ** | – | कहे गये हैं |
| **परिणीता** | – | ब्याही गयी |
| **अस्पृश्यतया** | – | छुआछूत के कारण |
| **प्रारब्धः** | – | आरम्भ किया |
| **प्रताडनशीलानाम्** | – | प्रताड़ित करनेवाली |

| | | |
|---|---|---|
| **निराकरणाय** | – | दूर करने के लिए |
| **रूढौ** | – | रूढ़ि में, रिवाज में |
| **शीर्ण** | – | फटा-पुराना, चिथड़ा |
| **पातुम्** | – | पीने के लिए |
| **सोढुम्** | – | सहने में |
| **उत्पीडितानाम्** | – | सताए गए का |
| **अश्रान्तम्** | – | बिना थके हुए |
| **महीयते** | – | बढ़-चढ़कर हैं |
| **पद्यबद्धम्** | – | कविता के रूप में |
| **गहनावबोधाय** (गहन+अवबोधाय) | – | गहराई से समझने के लिए |

## अभ्यासः



1. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत-**

(क) महाराष्ट्रस्य प्रथमा महिला शिक्षिका का आसीत्?

(ख) कस्य समुदायस्य बालिकानां कृते सावित्री अपरं विद्यालयं प्रारब्धवती?

(ग) कीदृशीनां कुरीतीनां सावित्री विरोधम् अकरोत्।

(घ) किमर्थं शीर्णवस्त्रावृताः नार्यः कूपात् जलं ग्रहीतुं वारिताः?

(ङ) सावित्र्याः मृत्युः कथम् अभवत्?

(च) तस्याः द्वयोः काव्यसङ्कलनयोः नामनी के?

© NCERT not to be republished

2. **अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत-**

स्वकीयम् – ..........................................................................
सविनोदम् – ..........................................................................
सक्रिया – ..........................................................................
प्रदेशस्य – ..........................................................................
मुखरम् – ..........................................................................
सर्वथा – ..........................................................................

3. **अधोलिखितानां पदानां विलोमपदानि लिखत-**

उपरि ......................
आदानम् ......................
परकीयम् ......................
विषमता ......................
व्यक्तिगतम् ......................
आरोहः ......................

4. **अधोलिखितानां पदानां लिङ्गं, विभक्तिं, वचनं च लिखत-**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| धूलिम् | .................. | .................. | .................. |
| नाम्नि | .................. | .................. | .................. |
| अपरः | .................. | .................. | .................. |
| कन्यानाम् | .................. | .................. | .................. |
| सहभागिताम् | .................. | .................. | .................. |
| नापितैः | .................. | .................. | .................. |



© NCERT
not to be republished

5. उदाहरणमनुसृत्य लकारपरिवर्तनं कुरुत-

| | वर्तमानकालः | अतीतकालः |
|---|---|---|
| यथा - | सा शिक्षिका अस्ति। | सा शिक्षिका आसीत्। |
| (क) | सा अध्यापने संलग्ना भवति। | |
| (ख) | सः त्रयोदशवर्षकल्पः अस्ति। | |
| (ग) | महिलाः तडागात् जलं नयन्ति। | |
| (घ) | वयं प्रतिदिनं पाठं पठामः। | |
| (ङ) | यूयं किं विद्यालयं गच्छथ? | |
| (च) | ते बालकाः विद्यालयात् गृहं गच्छन्ति। | |

© NCERT not to be republished